श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ द्विचत्वारिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ द्विचत्वारिंशः सर्गः ॥

## अशोकवाटिकायां श्रीसीतारामयोर्विहारो गर्भवत्याः सीतायास्तपोवनं द्रष्टुमिच्छाया उदयः श्रीरामेण तदर्थं स्वीकृतिप्रदानम्

स विसृज्य ततो रामः पुष्पकं हेमभूषितम्।
प्रविवेश महाबाहुरशोकवनिकां तदा॥ **7.42.1** ॥

चन्दनागुरुचूतैश्च तुङ्गकालेयकैरपि।
देवदारुवनैश्चापि समन्तादुपशोभिताम्॥ **7.42.2** ॥

चम्पकाशोकपुन्नागमधूकपनसासनैः।
शोभितां पारिजातैश्च विधूमज्वलनप्रभैः॥ **7.42.3** ॥

लोध्रनीपार्जुनैर्नागैः सप्तपर्णातिमुक्तकैः।
मन्दारकदलीगुल्मलताजालसमावृताम्॥ **7.42.4** ॥

प्रियङ्गुभिः कदम्बैश्च तथा च बकुलैरपि।
जम्बूभिर्दाडिमैश्चैव कोविदारैश्च शोभिताम्॥ **7.42.5** ॥

सर्वदा कुसुमै रम्यैः फलवद्भिर्मनोरमैः।
दिव्यगन्धरसोपेतैस्तरुणाङ्कुरपल्लवैः॥ **7.42.6** ॥

तथैव तरुभिर्दिव्यैः शिल्पिभिः परिकल्पितैः।
चारुपल्लवपुष्पाढ्यैर्मत्तभ्रमरसङ्कुलैः॥ **7.42.7** ॥

कोकिलैर्भृङ्गराजैश्च नानावर्णैश्च पक्षिभिः।
शोभितां शतशश्चित्रां चूतवृक्षावतंसकैः ॥ **7.42.8** ॥

शातकुम्भनिभाः केचित् केचिदग्निशिखोपमाः।
नीलाञ्जननिभाश्चान्ये भान्ति तत्र स्म पादपाः ॥ **7.42.9** ॥

सुरभीणि च पुष्पाणि माल्यानि विविधानि च।
दीर्घिका विविधाकाराः पूर्णाः परमवारिणा ॥ **7.42.10** ॥

माणिक्यकृतसोपानाः स्फाटिकान्तरकुट्टिमाः।
फुल्लपद्मोत्पलवनाश्चक्रवाकोपशोभिताः ॥ **7.42.11** ॥

दात्यूहशुकसङ्घुष्टा हंससारसनादिताः।
तरुभिः पुष्पशबलैस्तीरजैरुपशोभिताः ॥ **7.42.12** ॥

प्राकारैर्विविधाकारैः शोभिताश्च शिलातलैः।
तत्रैव च वनोद्देशे वैदूर्यमणिसन्निभैः ॥ **7.42.13** ॥

शाद्वलैः परमोपेतां पुष्पितद्रुमकाननाम्।
तत्र सङ्घर्षजातानां वृक्षाणां पुष्पशालिनाम् ॥ **7.42.14** ॥

प्रस्तराः पुष्पशबला नभस्तारागणैरिव।
नन्दनं हि यथेन्द्रस्य ब्राह्मं चैत्ररथं यथा ॥ **7.42.15** ॥

तथाभूतं हि रामस्य काननं सन्निवेशनम्।
बह्वासनगृहोपेतां लतागृहसमावृताम् ॥ **7.42.16** ॥

अशोकवनिकां स्फीतां प्रविश्य रघुनन्दनः।
आसने च शुभाकारे पुष्पप्रकरभूषिते ॥ **7.42.17** ॥

कुथास्तरणसंस्तीर्णे रामः सन्निषसाद ह।
सीतामादाय हस्तेन मधु मैरेयकं शुचि॥ **7.42.18** ॥

पाययामास काकुत्स्थः शचीमिव पुरन्दरः।
मांसानि च सुमृष्टानि फलानि विविधानि च॥ **7.42.19** ॥

रामस्याभ्यवहारार्थं किङ्करास्तूर्णमाहरन्।
उपानृत्यंश्च राजानं नृत्यगीतविशारदाः॥ **7.42.20** ॥

अप्सरोरगसङ्घाश्च किन्नरीपरिवारिताः।
दक्षिणा रूपवत्यश्च स्त्रियः पानवशं गताः॥ **7.42.21** ॥

उपानृत्यन्त काकुत्स्थं नृत्यगीतविशारदाः।
मनोऽभिरामा रामास्ता रामो रमयतां वरः॥ **7.42.22** ॥

रमयामास धर्मात्मा नित्यं परमभूषिताः।
स तया सीतया सार्धमासीनो विरराज ह॥ **7.42.23** ॥

अरुन्धत्या इवासीनो वसिष्ठ इव तेजसा।
एवं रामो मुदा युक्तः सीतां सुरसुतोपमाम्॥ **7.42.24** ॥

रमयामास वैदेहीमहन्यहनि देववत्।
तथा तयोर्विहरतोः सीताराघवयोश्चिरम्॥ **7.42.25** ॥

अत्यक्रामच्छुभः कालः शैशिरो भोगदः सदा।
प्राप्तयोर्विविधान् भोगानतीतः शिशिरागमः॥ **7.42.26** ॥

पूर्वाह्णे धर्मकार्याणि कृत्वा धर्मेण धर्मवित्।
शेषं दिवसभागार्धमन्तःपुरगतोऽभवत्॥ **7.42.27** ॥

सीतापि देवकार्याणि कृत्वा पौर्वाह्णिकानि वै।
श्वश्रूणामकरोत् पूजां सर्वासामविशेषतः॥ **7.42.28**॥

अभ्यगच्छत् ततो रामं विचित्राभरणाम्बरा।
त्रिविष्टपे सहस्राक्षमुपविष्टं यथा शची॥ **7.42.29**॥

दृष्ट्वा तु राघवः पत्नीं कल्याणेन समन्विताम्।
प्रहर्षमतुलं लेभे साधुसाध्विति चाब्रवीत्॥ **7.42.30**॥

अब्रवीच्च वरारोहां सीतां सुरसुतोपमाम्।
अपत्यलाभो वैदेहि त्वय्ययं समुपस्थितः॥ **7.42.31**॥

किमिच्छसि वरारोहे कामः किं क्रियतां तव।
स्मितं कृत्वा तु वैदेही रामं वाक्यमथाब्रवीत्॥ **7.42.32**॥

तपोवनानि पुण्यानि द्रष्टुमिच्छामि राघव।
गङ्गातीरोपविष्टानामृषीणामुग्रतेजसाम्॥ **7.42.33**॥

फलमूलाशिनां देव पादमूलेषु वर्तितुम्।
एष मे परमः कामो यन्मूलफलभोजिनाम्॥ **7.42.34**॥

अप्येकरात्रिं काकुत्स्थ निवसेयं तपोवने।
तथेति च प्रतिज्ञातं रामेणाक्लिष्टकर्मणा।
विस्रब्धा भव वैदेहि श्वो गमिष्यस्यसंशयम्॥ **7.42.35**॥

एवमुक्त्वा तु काकुत्स्थो मैथिलीं जनकात्मजाम्।
मध्यकक्षान्तरं रामो निर्जगाम सुहृद्वृतः॥ **7.42.36**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे द्विचत्वारिंशः सर्गः॥